Gyanshauryam, International Scientific Refereed Research Journal
Available online at : www.gisrrj.com
OPEN ACCESS
© 2025 GISRRJ | Volume 8 | Issue 1 | ISSN : 2582-0095

# भारतीयज्ञानपरम्परायां गुरुः

डा. जे. बलिचक्रवर्ती
सहाचार्यः, साहित्यविभागः, राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः

**Article Info**
Volume 8, Issue 1

**Page Number :** 128-131

**Publication Issue :**
January-February-2025
**Article History**
Accepted : 20 Jan 2025
Published : 05 Feb 2025

**सारांशः-** गुरुः इति शब्दः संस्कृते "गु" इति अंधकारं, "रु" इति प्रकाशं सूचयति। यः अंधकारेण परिहृत्य ज्ञानप्रकाशं प्रदाति, सः गुरुः। गुरुः एकः आध्यात्मिक मार्गदर्शकः अस्ति, यो शिष्यं अज्ञानात् ज्ञानं प्रति मार्गदर्शयति। गुरुं बिना ज्ञानप्राप्तिरसम्भवः। अपि च जीवनस्य सम्यङ्मार्गे शिष्यं नयति। भारते गुरु-शिष्य परंपरा अतीवं प्राचीनं वर्तते। "गुरुर्ब्रह्मा गुरुर्विष्णुः" इति मन्त्रेण गुरोः माहात्म्यं वर्णितं वर्तते। गुरुः केवलं शारीरिक शिक्षामेव न, अपि तु आत्मज्ञानं, मोक्षप्राप्तेरुपायं च शिक्षयति। यः शिष्यं आत्मबोधे मार्गदर्शयति, सः गुरुः।गुरुः शिष्येण श्रद्धया, समर्पणतया च पूज्यते। गुरूपदेशेन शिष्यः जीवनस्य सत्यात्मानुभवं प्राप्तुं साहाय्यं कुर्वन्ति। भारतीयसंस्कृतौ गुरोरत्यन्तं महत्त्वपूर्णं स्थान विराजते। अतः मया भारतीयज्ञानपरम्परायां गुरुः इति शीर्षकमाश्रित्य लेखः विलिखितः।

**कूटशब्दाः** – गुरुः, शिष्यः, दशरथभक्तिः, रामः, शवरमतिः, विश्वामित्रः इत्यादयः।

**प्रस्तावना –**

**यो ब्रह्माणं विदधाति पूर्वं**
**यो वै वेदान् च प्रहिणोति तस्मै।**
**तं ह देवमात्मबुद्धिप्रकाशं**
**मुमुक्षुर्वै शरणमहं प्रपद्ये।।**[1] इति

वेदोक्तदिशा जगत्सृष्टिरपि गुरूपदेशेन विना न भवति इति स्पष्टम्। ब्रह्मापि पुरुषोत्तमात् गुरोः वेदविद्यां प्राप्य जगत्सृष्टौ प्रभुः बभूव। सृष्टिस्थितिलयकारकः परमात्मा पुरुषोत्तमोपि मनुष्यधर्मा भूत्वा भूलोके अवतीर्णः तदेव वेदवचनं प्रमाणीकृत्य परशुरामश्रीरामकृष्णादि अवतारेषु कमपि महात्मानं गुरुमङ्गीकृतवान्। स्वयं प्रतिभासम्पन्नोऽपि उत्तमाचार्यात् प्राप्तविद्यः एव धर्मपालने लोकसंरक्षणे प्रभविष्णुः भवति इति **"आचार्यवान् पुरुषो वेद"**[2] इति श्रुत्या श्रीमद्रामायणं बोधयति। सोऽपि गुरुः तपस्वाध्यायनिरतः अभिजनसम्पन्नः ज्ञानसम्पन्नश्च भवेदिति यथा–

**तपः स्वाध्यायनिरतं तपस्वी वाग्विदां वरम्।**

**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

**नारदं परिपप्रच्छं वाल्मीकिर्मुनिपुंगवम्।।**[3]

गुरूरेव परं ब्रह्मेति अस्माकं विश्वासः। गुरुतत्त्वं ईश्वरतत्त्वापेक्षया अधिकमिति शास्त्राणि उपदिशन्ति। श्रीमद्वाल्मीकिरामायणे बालकाण्डे सप्तसप्तीतितमसर्गे यथा –

**मातृभ्यो मातृकार्याणि कृत्वा परमयन्त्रितः।**

**गुरूणां गुरूकार्याणि काले कालेऽन्ववैक्षत।।**

एवं श्रीरामस्य गुरूणामुपरि निष्ठा प्रदर्शिता।

**दशरथगुरुभक्तिः** – श्रीमद्रामायणे बालकाण्डे वसिष्ठः एव समस्तस्य सूर्यवंशस्य आचार्यो बभुव। स्वयं सर्वज्ञोपि दशरथः गुरोः अनुज्ञया एव सर्वाणि कार्याणि अनुतिष्ठतिस्म। अत एव –

**इक्षाकुणां हि सर्वेषां पुरोधाः परमो गुरुः।**
**न चातिक्रमितुं शक्यं वचनं सत्यवादिनः।।**[4]

एवमिक्ष्वाकवः गुरुभक्ताः ब्रह्ममुखेन क्षत्रेण सर्वां धरित्रीं निष्कण्टकां पालयामासुः। एवं विधे वंशे जातः श्रीमन्नारायणः अपि सदाचारमेव अनुतिष्ठन् गुरोः विधेयः शिष्यो बभूव। स्वज्ञानेन सर्वाः विद्याः स्वयं सन्निधापयितुं शक्तोऽपि प्रथमं वसिष्ठस्य शिष्यो भूत्वा विधिवत् वेदाध्ययनादिकं सर्वं कृतवान्। वसिष्ठात् वेदविद्यां प्राप्य धनुर्वेदादिकं सर्वं पितुरेव अधिगतवान्।

**रामस्य विश्वामित्रः शुश्रुषा ( रामविश्वामित्रयोः गुरुशिष्यसम्बन्धः)** बालकाण्डे यज्ञरक्षार्थं रामलक्ष्मणौ निनीषुः अयोध्यामाजगाम। भीतः दशरथः रामं प्रेषयितुं नैच्छत्। वसिष्ठः एव दशरथमनुनीय रामलक्ष्मणौ विश्वामित्रानुयायिनौ प्रेषितवान्। सर्वज्ञः वसिष्ठः विश्वामित्रः सर्वाणि दिव्यास्त्राणि रामाय प्रदास्यति इति कृतनिश्चयः। अत एव प्रेषणकाले विश्वामित्रेण प्राप्तानां अस्त्राणां स्वरूपं बालकाण्डे दशरथमुक्तवान्।

स्वयं वसिष्ठः इमानि दिव्यास्त्राणि रामलक्ष्मणाभ्यां दातुं शक्तोपि प्रयोजनापेक्षया रामावतारसार्थक्यसम्पादनाय न दत्तवान्। विश्वामित्रोऽपि ताटकावधानन्तरं रामस्य अस्त्रग्रामरक्षणसामर्थ्यं निश्चित्येव दिव्यास्त्राणि दत्तवान्।

गुरोः आज्ञा सर्वथा न लङ्घनीया स्त्रीवधात् जुगुप्सितं रामं विश्वामित्रः धर्मसुक्ष्मं ज्ञापयामास।

**“नृशंसमनृशंसं वा प्रजारक्षणकारणात्।**
**पातकं वा सदोषं वा कर्तव्यं रक्षता सदा।।”**[5]

एवं गुरोः आदेशं मानयित्वा कौशिकवचनात् ताटकवधे रामः कृतनिश्चयः।

**“पितुर्वचननिर्देशात्पितुर्वचनगौरवात्।**

**वचनं कौशिकस्येति कर्तव्यमविशङ्कया।।**

**अनुशिष्टोऽस्म्ययोध्यां गुरुमध्ये महात्मना।**

**पित्रा दशरथेनाहं नावज्ञेयं हि तद्वचः।।**

**सोऽहं पितुर्वचः श्रुत्वा शासनाद् ब्रह्मवादिनः।**

**करिष्यामि न संदेहस्ताटकावधमुत्तमम्"।।**[6]

ताटकवधानन्तरमपि षडहोरात्रं अनिद्रं रामलक्ष्मणौ विश्वामित्रं ररक्षतुः।

**"तौ तु तद्वचनं श्रुत्वा राजपुत्रौ यशस्विनौ।**

**अनिद्रं षडहोरात्रं तपोवनमरक्षताम्।।**

**उपासांचक्रतुर्वीरौ रात्रौ परमधज्विनौ**

**ररक्षतुर्मुनिवरं विश्वामित्रमरिंदमम्"।।**[7]

एवं यक्षरक्षणं कृत्वा विद्याप्रदात्रे गुरवे गुरुदक्षिणामपि अर्पयामास। प्रीतोपि गुरुः सीतया रामं योजितवान्। एवं विश्वामित्रः श्रीरामौ अन्योन्यसहकृत्वानौ गुरुशिष्यौ बालकाण्डे निरूपितौ।

**शबरीमतङ्गयोः गुरुशिष्यसम्बन्धः -** अरण्यकाण्डेऽपि स्त्रियोपि योग्याः गुरुभक्ताः भवन्ति इति वाल्मीकिः शर्बयाः वृत्तान्तेन लोकान् बोधयामास।

मतङ्गमहामुनेः शिष्याणां परिचारिणी शबरी नाम श्रमणी गुरोः परमा भक्ता बभूव। मतङ्गशिष्याश्च तादृशप्रभावसम्पन्नाः येषां स्वेदादपि सुगन्धिन्यः पुष्पलताः आविर्भूताः। एवं मतङ्गस्य शिष्या अपि गुरोः अनुग्रहेणैव विष्णोः अवतारभूतस्य श्रीरामस्य दर्शनं प्राप्य स्वयं फलानि रामाय दत्वा गुरोः अनुग्रहादेव दिव्यान् लोकान् प्राप।

अरण्यकाण्डे त्रिसप्ततितमे सर्गे (73) चतुःसप्ततितमे(74) सर्गे च अस्याः कथा विस्तरेण वर्णिता। तन्निरूपकाः केचन श्लोकाः अत्रोदाह्रियन्ते।

**"तेषां गतानामद्यापि दृश्यते परिचारिणी।**

**श्रमणी शबरी नाम काकुत्स्थ चिरजीविनी।।**

**त्वां तु धर्मे स्थिता नित्यं सर्वभूतनमस्कृतम्।**

**दृष्ट्वा देवोपमं राम स्वर्गलोकं गमिष्यति।।**

**रामेण तापसी पृष्टा सा सिद्धा सिद्धसम्मता।**

**शशंस शबरी वृद्धा रामाय प्रत्यवस्थिता।।**

**एवमुक्ता महाभागैस्तदाहं पुरुषर्षभ।**

**मया तु संचितं वन्यं विविधं पुरुषर्षभ।।**

**इत्येवमुक्ता जटिला चीरकृष्णाजिनाम्बरा।**
**तस्मिन्मुहूर्ते शबरी देहं जीर्णं जिहासती।**
**अनुज्ञाता तु रामेण हुत्वाऽत्मानं हुताशने।।**
**ज्वलत्पावकसंकाशा स्वर्गमेव जगाम ह।**
**दिव्याभरणसंयुक्ता दिव्यमाल्यानुलेपना।।**
**दिव्याम्बरधरा तत्र बभूव प्रियदर्शना।**
**विराजयन्तो तं देशं विद्युन्सौदामिनी यथा"।।**[8]

**उपसंहार**: एवं गुरो: अनुग्रहेण अप्राप्यं ऐहिकं सुखं लोकोत्तरोविजय: सर्वोत्तमा पारलौकिकी मोक्षरूपा गतिश्च सर्वेषां भवतीति रामविश्वामित्रगुरुशिष्यसम्बन्धेन, श्रमण्या: शबर्या: गुरुसेवया च प्रकटीकृतं भवति। अत एव महाकविकालिदासेनापि वशिष्ठविषये उक्तम्। यथा –

**'इक्ष्वाकूणां दुरापेर्थे त्वदधीना हि सिद्धय:।'**[9] इति

**सन्दर्भ-**

1. श्रीमद्भागवतम्-1-1-1 श्लोक: श्रीधरीयव्याख्या
2. श्रीमद्रामायणम्- बालकाण्डे- 1-1 श्लोक: (व्याख्या- गोविन्दरार्जायं)
3. श्रीमद्रामायणम्- बालकाण्डे
4. श्रीमद्रामायणम्- बालकाण्डे – 58/3 श्लोक:
5. श्रीमद्रामायणम् – बालकाण्डे – 25/18 श्लोक:
6. श्रीमद्रामायणम् – बालकाण्डे – 26/ 2-4 श्लोका:
7. श्रीमद्रामायणम् – बालकाण्डे – 30/ 5,6 श्लोक:
8. श्रीमद्रामायणम् – अरण्यकाण्डे – 73/ 26,27 श्लोकौ; 74/10,17,32,33 श्लोका:
9. रघुवंशम् – प्रथमसर्ग:

**उपयुक्तग्रन्थसूची –**


1. श्रीमद्रामायणम् – परिमला पाबलिकेशन – दिल्ली- 2012
2. श्रीमद्भागवतम् – गीताप्रेस, गोरक्षपुर् – 2010
3. रघुवंशम् – चौखाम्बा संस्कृतसंस्थानम्, दिल्ली